© 2017 IJSRSET | Volume 3 | Issue 2 | Print ISSN: 2395-1990 | Online ISSN : 2394-4099
Themed Section: Engineering and Technology

# काव्यशास्त्रे औचित्यविमर्शः

**डॉ0 राजकुमारः**
उत्तरप्रदेशान्तर्गतसोनभद्र–
जनपदान्तर्गतसरवट–ग्रामे–231215

अलंकारशास्त्रेतिहासे औचित्य सम्प्रदायस्य महत्त्वपूर्णं स्थानं वर्तते। औचित्यस्य लौकिकेऽपि जगति सर्वत्र साम्राज्यमस्ति। औचित्याश्रितो व्यवहार एव सद्व्यवहार इति मन्यते। औचित्यच्युतो व्यवहारश्च दुर्व्यवहारो भवति। लोकव्यवहारे औचित्यस्य सन्निवेशः सुष्टुप्रकारेण क्रियते। औचित्यस्य अभावे वस्तुनः सत्तैव नैव दृष्यते। एवं लौकिक साहित्यवत् औचित्यस्य आध्यात्मिक साहित्येऽपि सर्वोपरि स्थानम्। औचित्यस्य कल्पना संस्कृत साहित्ये अनादिकालदेव दृष्यते प्रचलिता। नाट्यशास्त्रे औचित्यं न हि सिद्धान्तरूपेण परं व्यवहाररूपेण तु दृष्यत एव। भरतस्य कथनं वर्तते। यल्लोके यद्वस्तु यस्मिन् रूपे यस्मिन् वेशे यस्यां मुद्रायामुपलभ्यते,तस्य तस्मिन् रूपे तस्मिन् वेशे तस्यां मुद्रायामनुकरणं नाट्यस्य चरमं लक्ष्यम्। अतो नाट्यशास्त्रे पातस्य वेशपात्रादिविधानं समर्थ्यते। भिधा प्रकृतिः ,दिव्य,अदिव्य,दिव्यादिव्येति भेदात्। त्रिषु प्रकृतिष्वपि वैलक्षण्यम्। रंगस्थले यथार्थरूपेणानुकरणं नाटककारस्य साफल्यद्योतकम्। दिव्यप्रकृतौयत् कार्यंतद्दिव्यं अप्रकृतौ कदापि न शोभते। न च तदभाषण प्राकरोऽपि मनुष्मात्रे सुसंगतो भवति। इत्यस्य विवेचनं नाट्यशास्त्रे विस्तृतरूपेण मिलति। अनेन प्रतीयते यद् भरतो नाट्य औचित्यं मूलरूपेण स्वीकरोति। सम्बन्धेऽस्मिन् श्लोकेऽयं भरतस्य निभालनीयो यथा–

**अदेशजो हि वेशस्तु न शोभां जनयिष्यति।**
**मेखलोरसि बन्धे च हास्यायैव प्रजायते।।**[1]

भावोऽय यस्य देशस्य यो वेशोऽस्ति यथा भूषणं च यस्मिनंगे धार्यतत् तस्माद् भिन्ने देशेङ्गे च तस्य शोभा न भवति। यदि कोऽपिजनो कटौ बन्धनीयामेखलामुरसि धारयेत् तर्हि स उपहासपात्रमेव भविष्यति। यत्स्थानीयं भूषणमस्ति तत्स्थानीयैव तस्य शोभा। अनेन प्रतीयते यदादिमः समालोचकः काव्य शास्त्रि पितामहो भरतो ललित कलायामौचित्य सिद्धान्तः स्यावश्यकतां स्वीकृतवान्। कनाप्यन्येनापि शोभनमुक्तम्–

**स्थानभ्रष्टा न शोभन्ते दन्ताः केशा नखा नराः।।**[2]

परं न केवलं दन्ताः केशा,नखा,नरा अपि स्थानभ्रष्टा अपकीर्ति अशोभा च प्राप्नुवन्ति परं संसारे यत्किंचिदपि वस्तु स्थानभ्रष्टं स्यात्। तन्नैव शोभते कुत्रापि। अलंकाराः आहोस्विद् गुणाः रसा रीतयो वृत्तय इत्यादि सर्वमपि औचित्याभावे नैव स्वकीयं महत्त्वं भजति। अतः औचित्यस्य सर्वत्र सर्वदा च परमानिवार्यता अपेक्ष्यत इति।

औचित्यस्य क्रमिको विकासः औचित्यसम्प्रदायस्य समर्थका अनेके आचार्य बभूवुः। तेष्वाचार्येषु ध्वनिकारस्य आनन्दवर्धनस्य महत्त्वपूर्णं स्थानं वर्तते। परं आनन्दवर्धनात् प्राङ्माधकविरपि अस्य सिद्धान्तस्य समर्थकः आसीत्। तेन हि गुणौचित्यं मुख्यतया स्वीकृतम्। तथा च शिशुपालवधे राजनीति सम्बन्धे पद्यमिदम्–

**तेजः क्षमावानैकान्तं कालज्ञस्य महीपतेः।**
**नैकमोजः प्रसादो वा रसभावविदः कवेः।।**[3]

अनेन पद्येन कविना वणितं यत्कविनाऽपि राजवत् विशेषगुणा निरीक्षणे प्रतिभायुक्तेने भाव्यम्। कश्चित्कविर्यदि कस्याप्येकस्य गुणस्योपस्थापने निपुणस्तर्हि स नैव कविः कथ्यते। तत्र समेषां गुणानाम् औचित्येन सन्निवेशेन भाव्यम्। तदैव तस्य महत्वमन्यथा निरर्थक एव तस्य प्रयत्नः। अतोऽनेन प्रतीयते यद माघेन गुणौचित्यं स्वीकृत्य औचित्याय महत्त्व दत्तम्। तदनन्तरं भामहनापि काव्यलंकारे औचित्यतत्वस्यं सकेतः कृतः। तस्यहि

कथनमस्ति यत्काव्ये औचित्यगुणः स्यात्तर्हि समेषां गुणानां तस्मिन् अन्तर्भावो भवितुं शक्यते। अनौचित्यदोषे च समेषां दोषणाम्। दुष्टा उक्तिरपि संन्निवेशविशेषणा तथैव शोभां धारयति यथा स्रजां मध्ये नीलपलाशमपि शोभां धारयति। यथा–

**सन्निवेशात्तु दुरुक्तमपि शोभते।**
**नीलं पलाशमाबद्धमन्तराले स्रजामिव।।**[4]

एवमेव नैसर्गिक मलीमसमजनं कान्ताविलोचनन्यस्तं शोभां धारयति। यथा–

**किंचिदाश्रयसौन्दर्याद् धत्ते शोभामसाध्यपि।**
**कान्ताविलोचनन्यस्तं मलीमसमिवाञ्जानम्।।**[5]

अत औचित्यस्य सन्निवेशोस महत्ता च स्वतः सिध्यति। आनन्दवर्धनाचार्यः औचित्यसिद्धान्तस्य सर्वमान्यो विद्वान्। अनेनौचित्यस्य काव्येऽपरिहार्यत्वं स्वीकृतम्। औचित्याभावे रसभंगदोषो भवति इत्यानन्द वर्धनः। यथा–

**अनौचित्यात् ऋते नान्यद् रसभंगस्य कारणम्।**
**औचित्योपनिवन्धस्तु रसयोपनिषत्परा।।**[6]

अयं भवो यत् अनौचित्यमेव रसभंगस्य कारणम् प्रधानम्।अनुसितवस्तु संन्निवेशेन रसपरिपाको नोपपद्यते। अत औचित्येनैव कास्यचिद् वस्तुनः उपनिबन्धनं काव्ये कल्पनाविधानं च आनन्देन हि स्वध्वन्यालोके औचित्यस्य कृते महत्वपूर्ण स्थानं प्रदत्तम्। तेन हि गुण रीत्यलंकाररस वृत्यादीनां काव्यतत्त्वनामौचितत्येन सन्निवेशे एव काव्यत्वं स्वीकृतम्। अन्ते च।

**वाच्यानां वाचकानां यद् औचित्येन नियोजनम्।**
**रसादि विषयेणैतत् मुख्यं कर्म महाकवेः।।**[7]

ध्वन्यालोकस्य टीकाकारेण अभिनवगुप्ताचार्येण औचित्यसमर्थकानां ध्वनिविरोधिनां च समालोचना कृता। अस्य कथनमस्ति यद् ध्वनिं विनौचित्यस्य प्रतिष्ठां नैव भवति। अत औचित्यं ध्वनिश्च परस्परोपकारकरूपेध काव्यजगति अवतीर्णा भवताम्। साहित्यशास्तत्रेऽभिनवगुप्तस्य प्रधानशिष्यः क्षेमेन्द्र आसीत् यश्च तत्वतो ध्वनिवादी आसीत्। परं तेन औचित्यविचारचर्चा नामको ग्रन्थो विरच्च औचित्यं व्यापककाव्यतत्त्वरूपेण प्रतिष्ठापितम्। औचित्यसिद्धान्तस्य मान्यः आचार्य क्षेमेन्द्र एव। औचित्यतत्वस्य व्यापकत्वेन चित्रणं तत्रभवता क्षेमेन्द्रेणैवकृतम्।
किंनामौचित्यम्?किं च तस्य लक्षणम्?इति विचार्यतेऽधुना।यद् वस्तु यत्सदृशं तेन सह यस्य मेलनं भवेत् तदुचितम् उचितस्य भावः औचित्यं। तद्‌यथा–

**उचितं प्राहुराचार्यः सदृशं किल यस्य यत्।**
**उचितस्य च यो भावस्तदौचित्यं प्रचक्षते।।**[8]

औचित्यमेव रसस्य जीवितभूतं काव्ये चमत्मारश्च वर्तते। यथा–

**औचित्यस्येव चमत्कारिणश्चारुचर्वणे।**
**रस जीवितभूतस्य विचारं कुरुतेऽधुना।।**[9]

पुः कथ्यते यत् रससिद्धस्य काव्यस्रू जीवितमौचित्यमेव भवति। यथा–चौक्तम्–

**अलंकारास्त्वंकारा गुण एव गुणः सदा।**
**औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम्।।**[10]

तत्र क्षेमेन्देण औचित्यस्यानेके भेदाः पदवाक्यार्थरसकारक वचनालिंगकाल देशादिरूपेण परिगणिताः। अनेन हि सम्यक् प्रकारेण औचित्यरू परिपालनं पदर्शयित्वा तदभावस्य च निदर्शनमन्यत्र प्रदर्श्य साहित्यरसिकानां मानुपकारः कृतः। औचित्यस्य कतिपयप्रभेदवर्णनं क्रियतेऽत्र। शृंगाररोचित्योदाहरणं यथा–

**अप्रसारय घनसारं कुरु हारं दूर एव किं कमलैः।**
**अलमलमालि मृगालैरिति वदति दिवनिशं वाला।।[11]**

अत्र विप्रलम्भः श्रृंगारो वर्तते अस्य पूर्वर्द्धे रेफस्यासकृदावृत्त्या उत्तरार्धे च लकरस्यावृत्यानुप्रासः प्रकृतरसस्य नितान्तपोषकः। लकाररस्य बहुलप्रयोगः गलित प्रायपदानां विन्यासश्च विप्रलम्भ श्रृंगारस्योत्कर्षको वर्तते। गुणौचित्यं यथा कादम्बर्याम्–

**हारो जलार्द्रवसनं नलिनीदलानि प्रालेयशीकरमुचः तुहिनांशुभासः।**
**यस्येन्धानानि सरसानि च चंदनानि निर्वाणमेष्यति कथं स मनोभवाग्नि।।[12]**

अत्र माधुर्यस्य सौकुमार्यस्य च गुणयोगः समुचितः। विरहवर्णने माधुर्यस्यभावः उत्कर्षको भवति।

अनेन प्रकारेण क्षेमेन्द्रेण साहित्यशास्त्रे औचित्यं व्यवस्थितरूपेण प्रतिष्ठापितम्। परं मौचित्यस्योद्भावकरूपेण क्षेमेन्द्रो नैव स्वीकर्तु शक्यते। अनेन हि अस्य विवेचनस्य कृते भरतान्दवर्धनौ अनुकृतौ। औचित्यस्य सर्वे भेदा ध्वन्यालोकेऽपि मिलन्ति। अनेन अप्रकारे औचित्यसिद्धान्तस्य साहित्यशास्त्रे सर्वोपरि सर्वमान्यं च स्थानं वर्तते। सिद्धान्तोऽयं साहित्यक्षेत्रे महत्वपूर्ण स्थानं भजतीति न संदेहावसरोऽत्रेति।

सन्दर्भग्रन्थः–

1.आचार्य भरत–नाट्यशास्त्र पृ0 231
2. आचार्य भरत–नाट्यशास्त्र पृ0 236
3.शिशुपालवधम् 8.12
4.भामह–काव्यालंकारः पृ.210
5.भामह–काव्यालंकारः पृ.120
6.क्षेमेन्द्र–1.4
7.काव्यशास्त्र एक अध्ययन पृ0542
8.क्षेमेन्द्र–3.2
9.क्षेमेन्द्र 2.1
10. क्षेमेन्द्र 1.5
11.क्षेमेन्द्र 4.5
12.कादम्बरी पृ 20